भाष्यते अनेन (माध्यमेन), भाषणाद्भाषा, अभिप्रायविचारादीनां व्यक्तीकरणमाध्यमः भाषा इत्यादयः ना नाव्युत्पत्त्यर्थाः, भाष् व्यक्तायां वाचि इत्यस्माद्धातोः स्त्रियां निष्पन्नस्य भाषा इति पदस्य वर्तन्ते । ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती इति अमरकोशे भाषापदस्य समानार्थकपदानि प्रयुक्तानि । यद्येवमर्थः तर्हि अनेके ध्वनयः(अर्थाद्वर्णाः) अभिप्रायप्रकटने उत्पाद्यन्ते । तेषां विभिन्नध्वनीनां समूहः एव भाषा । अतः सामान्यतो मानवः स्वाभिप्रायान्विचारादींश्च व्यक्तीकर्तुमुपयुज्यमानमाध्यम एव भाषा इति वक्तुं शक्नुमः । Language is a medium, which man use to express different feelings, opinions and thoughts etc. अस्मिन्नर्थे आङ्ग्लभाषायां विद्यमानं Language इति पदं लाटीनभाषायाः Lingua इति शब्दान्निष्पन्नम् । Lingua नाम जिह्वा (रसनम्) इत्यर्थः । विश्वस्मिन्विविधाः भाषाः दरीदृश्यन्ते । तासु सर्वप्राचीना शुद्धा स्पष्टा श्रेष्ठा देवभाषेतिकीर्तिता संस्कृतभाषा । भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती इति सूक्तिः संस्कृतभाषायाः वैशिष्ट्यं वर्णयति । विश्वस्मिन्विद्यमानास्वेव सर्वासु भाषासु संस्कृतस्य व्याकरणं व्यवस्थितं क्रमबद्धतया अधिगन्तुं योग्यञ्च वर्तते । संस्कृतव्याकरणमिति श्रवणेन निपाताः, तिङन्तानि, सुबन्तानि, तद्धितान्तानि. कृदन्तानि, कारकाणि, समासाः इत्यादयोः नैके विषयाः झटिति स्मृतिपथमायान्ति।

वर्णसमूहैः पदानि निर्मितानि भवन्ति, चेत्तेषां पदानां समूहेन समस्तपदानि वाक्यानि वा रचितानि भवन्ति । विवक्षोः सङ्कल्पितार्थानुगुणं पदानि संयुज्यैकपदीभूत्वा वाक्यरचनायां प्रयुक्तानि भवन्ति। पदानां तादृशैकपदीभवनमेव समासः, समसनं समासः, अनेकस्य पदस्य एकपदीभवनं सङ्क्षेपीकरणं वा समासः इत्यादयः स्पष्टार्थाः समासः इति पदस्य वर्तन्ते । भाषायां समासानां विशिष्टं स्थानं प्राकल्पिशास्त्रज्ञैः ।

तत्र प्राक्कडारात्समासः(अ. सू. सं. –२/१/३) इति सूत्रेण समाससंज्ञा विधीयते । कडाराः कर्मधारये (अ. सू. सं. – २/२/३८) इत्यतः प्राक्समासः इत्यधिक्रियते इति सूत्रार्थः । सहसुपा(अ. सू. सं. – २/१/४)

इत्यनेन सूत्रेण समासः सुबन्तानामेव भवतीति स्पष्टम् । अतः अर्थानुगुणम् अनेकस्य सुबन्तस्य योगेनैव एकपदीभवनमेव समासः इति वक्तुं शक्नुमः । अर्थस्पष्टीकरणाय पदानां विच्छेदं यत्कुर्मः तस्य विग्रहः / विग्रहवाक्यमित्युच्यते । विग्रहभेदाद्यंशानाधृत्य विभिन्नप्रकारकसमासाः व्याकरणशास्त्रे दर्शितास्सन्ति। तत्र प्रधानतया चत्वारः प्रकाराः भवन्ति। यथा – तत्पुरुषः, बहुव्रीहिः, द्वन्द्वः, अव्ययीभावश्च। एतादृशसमासादि व्याकारणांशानां बोधनाय विविधाः विधयः उपायाश्च बहोः कालात्प्रचलन्त्येव। तेषु परम्परागता आधुनिकाश्च इति विभागं कर्तुं शक्नुमः।

**परम्परागतपद्धत्यनुसारं व्याकरणबोधनस्य विधयः –**

१. प्रतिपदपाठविधिः। २. सूत्रविधिः।
३. वार्तिकपद्धतिः। ४. भाष्यविधिः (वाकोवाक्यपद्धतिः)।
५. काशिकाविधिः (अष्टाध्यायीपद्धतिः) ६. कौमुदीविधिः (प्रक्रियापद्धतिः)।
७. पद्यपद्धतिः। ८. काव्यविधिः।

एवंरीत्या समासः इति विशिष्टव्याकरणविषयस्य बोधनाय अनेके विद्वांसः एतान्विधीन् प्रादर्शयन् । कमप्येकं विधिमाश्रित्य कदाचिन्मिश्रितविधीन् आश्रित्य वा गुरुः शिष्यमुपाविश्य बोधयति स्म । विशेषतः प्राचीनकाले व्याकरणं बोधयितुमधिकतया काशिकाविधिमाश्रितवन्तः। परन्त्वाधुनिकाः इदानीमधिकतया कौमुदीविधिमनुसरन्ति । आधुनिकाः शिक्षाशास्त्रिणस्तेषु प्राचीनविधिषु मनोवैज्ञानिकांशानां न्यूनता वर्तत इति विनूतनविधीनाम् अन्वेषणमकार्षुः ।

**व्याकरणशिक्षणे आधुनिकविधयः –**

1. प्रत्यक्षविधिः। २. आगमनविधिः।
३. ह्युरिष्टिक्विधिः। ४. आगमननिगमनविधिः।
५. प्रायोजनविधिः। ६. शिबिरविधिः।
७. भण्डारकरविधिः। ८. समस्यासमधानविधिः।
९. अनौपचारिकविधिः। १०. निदर्शनविधिः।
११. सङ्गणकसहकृतविधिः। १२. अभिक्रमिताधिगमः।

तेषु विनूतनविधिष्वन्यतमोऽयम् अभिक्रमिताधिगमः अथवा अभिक्रमितानुदेशनम् । अभिक्रमितः इति शब्दस्य क्रमबद्धः योजनाबद्धः वेत्यर्थः । क्रमबद्धरीत्या सोपानानुगुणं विषयप्रतिपादनप्रक्रियैव अभिक्रमिताधिगमः । सर्वेषां लक्ष्यं भवति शिक्षकाणां छात्राः अधिगमं प्राप्नुयुरिति । अधिगमो नाम स्थिरं व्यवहारपरिवर्तनमित्यतः बोधितांशः छात्राणां मनसि स्थिरो जायेत । अत एव विभिन्नोपायैः बोधनं क्रियते । तत्रायं विधिः शिक्षणम् अनुदेशनं वा भवति अभिक्रमिताधिगमः । अत्र विशेषतः स्वाध्यायः एव प्रचलति।

अभिक्रमितानुदेशनं पाठ्यं / पाठसामग्रीं विद्यार्थिनां पुरतः सोपानानुगुणम् अत्यन्तसामान्यभाषया विश्लिष्य लघु-लघुघटकेषु विभज्योपस्थापयति । तस्याः सामग्र्याः सहायेन छात्राः अधिगमं प्राप्नुवन्ति । प्रक्रियेयं मनोवैज्ञानिकी, छात्रनिष्ठा, क्रियाशीला, छात्रेषु आत्मविश्वाससम्पादिका च भवति । अस्य प्रधानतया त्रयः प्रकाराः सन्ति । यथा –

१. रेखीयाभिक्रमः (Linear Programme)

२. शाखीयाभिक्रमः (Branching Programme)

३. अवरोह्याभिक्रमः (Methetics Programme )

मनोवैज्ञानिकस्य बी.एफ्.स्किन्नर महोदयस्य सक्रियनिबन्धनम् (Operant Conditioning) इति सिद्धान्तमाधारीकृत्यरेखीयाभिक्रमः(Linear Programme) आविष्कृतः। सः महोदयः कपोतानामुपरिप्रयोगं कृत्वा सिद्धान्तममुं प्रत्यपादयत्स्वकीये Science of Learning and Art of Teaching इति लेखे।

**रेखीयाभिक्रमस्य स्वरूपम् -**

रेखीयाभिक्रमे बोधनांशः लघुघटकेषु (खण्डेषु) सोपानानुगुणं प्रतिपाद्यते । प्रतिखण्डं नूतनविषयज्ञानम्, अभ्यासः, प्रश्नाः, समाधानानि च भवन्ति । अभ्यासं कृत्वा प्रदत्तान्प्रश्नानुत्तीर्य अग्रिमखण्डं प्रतिगम्यते । यदि प्रश्नानामुत्तरं न प्राप्यते तर्हि विशिष्टशैल्या प्रदत्तान्युत्तराणि दृष्ट्वा अभिप्रेरणयाग्रिमखण्डं प्रति गम्यते । अत्र समाधानाधारणेन अधिगमस्तरः परिशील्यते । अस्मिन्मुख्यतया बहुरूपधाराः (Frames) भवन्ति । प्रत्येकस्यां रूपधारायां त्रयः अंशाः प्रधानतया भवन्ति । यथा– १. प्रेरकम् (उद्दीपनम्) २.प्रतिक्रिया (क्रियाः) ३.प्रतिपुष्टिः(पुनर्बलनम्) इति । अतः आधुनिकाः शास्त्रज्ञाः व्यचिन्तयन्यत्कठिनमिति मन्यमानस्य व्याकरणस्याध्ययनाय रेखीयाभिक्रमः समीचीनः सूक्तश्चविधिः स्यादिति । प्रायोगिकरीत्या विधिममुं प्रयुज्य समासानामधिगमः कथं जायते इति दिद्रक्षया विषयोऽयं चितो मया।

अत्र समासबोधनाय सरलयाभाषया माध्यमिकस्तरीयच्छात्राणां कृते बहुरूपधारा (Frames) रचिताः । सर्वप्रथमं प्रस्तुतविषयस्य परिचयः प्रदायि । अनन्तरमभ्यासकार्यार्थं कानिचन उदाहरणानि प्रदर्शितानि । पूर्वं कृतमभ्यासमाधारीकृत्य केचन प्रश्नाः अधिगमपरीक्षणाय प्रदत्ताः । छात्राः स्वाध्यायेन सर्वमपि विषयं पठित्वा अवगन्तुं प्रायतन्त । तदनु प्रदत्तान्प्रश्नान्समाधातुं स्वकौशलप्रदर्शनमकुर्वन् । प्रत्येकं प्रश्नस्य निर्दिष्टं स्पष्टमुत्तरमासीत् । तत्प्राप्तये प्रयासे कृतेऽपि न प्राप्यते चेत्, मया तिर्यग्रूपेण प्रदत्तान्युत्तराणि दृष्ट्वा समाधायाग्रिमखण्डं प्रत्यगच्छन् । एवमेव समामासानां स्वाध्यायेन बहवः छात्राः अधिगमं प्राप्तवन्तः। उदाहरणार्थमत्रैका रूपधारा चित्रमाध्यमेन प्रदर्श्यते । यथा –

## रूपधारा (Frame)




### समासाधिगमरूपधारा

### प्रस्तावनाखण्डः (Introductory Frame)

**परिचयः –**

वयं संस्कृतभाषायां वाक्यप्रयोगसन्दर्भे अनेकानि पदानि वदामः । वाक्यं नाम अर्थानुगुणं क्रमानुसारं योजितानां पदानां समूहः । वाक्ये कदाचित् एकीभूतानि (समस्तानि) अथवा पृथक् पृथक् प्रयुक्तानि पदानि भवन्ति । अधोदत्तानि उदाहरणानि पश्यन्तु ।

१. गङ्गा – जलम्  २. वृक्ष - मूलम्  ३. माता-पितरौ  ४. राज-पुरुषः

* उपर्युक्तानि पदानि प्रयुज्य वाक्यं रचयामः –

१. गङ्गाजलं पवित्रं भवति ।  २. वृक्षमूलं छायायुक्तं भवति ।
३. मातापितरौ प्रत्यक्षतया देवौ स्तः । ४. राजपुरुषः सन्देशम् आनयति ।

* एतानि पदानि अर्थानुगुणं सविभक्तिकं पृथक् कृत्वा वाक्यं रचयामः ।

१. गङ्गायाः जलं पवित्रं भवति ।  २. वृक्षस्य मूलं छायायुक्तं भवति ।
३. माता च पिता च प्रत्यक्षतया देवौ स्तः । ४. राज्ञः पुरुषः सन्देशम् आनयति ।

* एवं पृथक् कृतानि पदानि संयोज्य एकमेव (समस्तं) पदं कुर्मः ।

१. गङ्गायाः जलम् = गङ्गाजलम्  २. वृक्षस्य मूलम् = वृक्षमूलम्
३. माता च पिता च = मातापितरौ  ४. राज्ञः पुरुषः = राजपुरुषः

**अभ्यासः –**

प्रश्नः – अधो दत्तानि समस्तपदानि पृथक् कृत्वा रिक्तस्थाने लिखत । (यद्युत्तरं न प्राप्यते तर्हि निर्देशं दृष्ट्वा सम्यक् ज्ञात्वाग्रिमखण्डं गच्छन्तु)

१. यमुनाजलम् = ______________________

२. राजपुत्रः = ______________________

३. पार्वतीपरमेश्वरौ = ______________________

४. विद्यापीठम् = ______________________

**निष्कर्षः –**

अत्र केवलं परिचयात्मकः को नाम समासः ? इति प्रस्तावनां कर्तुम् उदाहरणरूपेण प्रस्तावनाखण्डः प्रादर्शि । एवं रीत्या प्रत्येकं समासस्य एकैकः खण्डः भवति । सर्वेषां समासानां रूपधारां निर्माय स्वाध्यायं कारयित्वा सुलभतया छात्रान् बोधयितुं शक्नुमः । अवश्यमेव एतादृशी स्वाध्यायसामग्री छात्राणामुपरि प्रभावं जनयति । अधिगमप्रक्रियापि मनोवैज्ञानिकरीत्या सक्रिया च भवति । प्रायोगिकरीत्यापि समासबोधने रेखीयाभिक्रमविधिरयं सफलः उद्देश्यसाधकश्च इति निष्कर्षरूपेण वदामः । एवमनेकेषां व्याकरणांशानां बोधने अभिक्रमिताधिगमः नितरां सहकारीति वक्तुं शक्नुमः।

**अनुशीलितग्रन्थाः –**

१. वैयाकरणसिद्धान्तकौमुदी, सम्पादकः-शास्त्रीगोपालःनेने, चौखम्बाअमरभारतीप्रकाशनम्, वाराणसी।

२. समासः, विद्वान्महाबलेश्वरभट्टः, संस्कृतभारती, बेङ्गलूरु।

३. संस्कृतशिक्षणं नूतनप्रवृत्तयश्च, डा. च. ल. न. शर्मा, डा. फतेहसिंहः, भारतमुद्राप्रकाशनम्, केरलम्।

४. शैक्षिकप्रविधिः, डा. रमाकान्तमिश्रः, चौखम्बाविद्याभवनम्, वाराणसी।

५. शैक्षिकतकनिकी एवं प्रबन्ध, जे. सी. अगरवाल, विनोदपुस्तकमन्दिर, आगरा।

६. रेखीयाभिक्रमिताधारितसमासाधिगमः, डा. कुमारः, चारुलप्रकाशनम्, नागपुरम्, महाराष्ट्रम्।



शिक्षाशास्त्रविभागीयप्रथमवर्षस्य छात्राः

षष्ठोऽङ्कः, 2018-19

ISSN 2395-7921

# शिक्षारश्मिः

समीक्षिता मूल्याङ्किता च वार्षिकशोधपत्रिका

**A Peer Reviewed Refereed Annual Research Journal**

**प्रधानसम्पादकः**

प्रो. सुदेशकुमारशर्म्मा

**सम्पादकः**

डा. देवदत्तसरोदे

**शिक्षाशास्त्रविभागः**

**राष्ट्रियसंस्कृतसंस्थानम्**

(मानितविश्वविद्यालयः)

क.जे. सोमैयासंस्कृतविद्यापीठम्

विद्याविहारः, मुम्बई - 77

Scanned with OKEN Scanner



प्रो. सुदेशशर्मा
प्राचार्यः



डा. देवदत्तसरोदे
विभागाध्यक्षः



डा. वि.एस्.वि. भास्कररेड्डी



डा. कुमारः



डा. विनोदकुमारशर्मा



डा. सचिनकुमारः



डा. मनीषकुमारचाण्डकः



डा. जितेन्द्रकुमाररायगुरुः

Scanned with OKEN Scanner

Peer Reviewed Refereed Journal ISSN : 2395-7921

# शिक्षारश्मि:

## शिक्षाशास्त्रविभागीयवार्षिकशोधपत्त्रिका

## Annual Research Journal of Department of Education

(समीक्षिता मूल्याङ्किता च शोधपत्त्रिका)

**2018 - 19**

ख्यातं राष्ट्रियसंस्कृतं सुमहितं संस्थानमद्याखिलं
वाणीवैभवमातनोति नितरां राष्ट्रे चतुर्दिग्भवम्।
तत्रासौ निजगौरवेण महता सारस्वतं भासयन्
सोमय्याभुवि भासते परिसरो विद्याविहारे स्थित:।।

संरक्षक:
आचार्य: परमेश्वरनारायणशास्त्री
कुलपति:, राष्ट्रियसंस्कृतसंस्थानम् (मा. वि.) नवदेहली

प्रधानसम्पादक:
आचार्य: सुदेशकुमारशर्म्मा
प्राचार्य:, क. जे. सोमैयासंस्कृतविद्यापीठम्, मुम्बई

सम्पादक:
डॉ. देवदत्तसरोदे

राष्ट्रियसंस्कृतसंस्थानम्
भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनम्
(मानितविश्वविद्यालय:)
क. जे. सोमैयासंस्कृतविद्यापीठम्
विद्याविहार: (पूर्वम्) मुम्बई - 400077

Scanned with OKEN Scanner

| | | |
|---|---|---|
| पत्रिकानाम | : | शिक्षारश्मि: (शिक्षाशास्त्रविभागीयवार्षिकशोधपत्रिका) |
| प्रकाशक: | : | शिक्षाशास्त्रविभाग:, राष्ट्रियसंस्कृतसंस्थानम् (मा. वि.), मुम्बई - 77 |
| © प्रतिलिप्यधिकार: | : | प्रकाशकाधीन: |
| ISSN | : | 2395-7921 |
| संरक्षक: | : | आचार्य: परमेश्वरनारायणशास्त्री, कुलपति: |
| प्रधानसम्पादक: | : | आचार्य: सुदेशकुमारशर्मा, प्राचार्य: |
| सम्पादक: | : | डॉ. देवदत्तसरोदे, विभागाध्यक्ष: |
| सम्पादकमण्डलम् | : | डॉ. वि. एस्. वि. भास्कररेड्डि<br>डॉ. कुमार:<br>डॉ. विनोदकुमारशर्मा<br>डॉ. सचिनकुमार:<br>डॉ. मनिष चाण्डक:<br>डॉ. जितेन्द्रकुमाररायगुरु: |

## मूल्याङ्कनकर्तृमण्डलम्

- **प्रो. प्रकाशचन्द्र:**
  प्राचार्यचर:, क.जे. सोमैयासंस्कृतविद्यापीठम्, मुम्बई
- **प्रो. सुदेशकुमारशर्म्मा**
  प्राचार्य:, क.जे. सोमैयासंस्कृतविद्यापीठम्, मुम्बई
- **प्रो. बोधकुमारझा**
  विभागाध्यक्ष:, व्याकरणविभाग:,
  क.जे. सोमैयासंस्कृतविद्यापीठम्, मुम्बई
- **डॉ. मुरलीकृष्ण:**
  सहायकाचार्य:, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

## पुनर्वीक्षकमण्डलम्

- **प्रो. एन. एन. जोशी**
  आचार्यचर:, क.जे. सोमैयाकलावाणिज्यमहाविद्यालय:, मुम्बई
- **प्रो. लोकमान्यमिश्र:**
  विभागाध्यक्ष:, शिक्षाविभाग:, राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.)
  लखनऊपरिसर:, लखनऊ
- **प्रो. प्रह्लादजोशी**
  विभागाध्यक्ष:, शिक्षाविभाग:, आर्. एस्. वि.पि., तिरुपति:
- **प्रो. जयकृष्णन्**
  आचार्य:, शिक्षाविभाग:,
  श्रीलालबहादुरशास्त्रीसंस्कृतविद्यापीठम्, नवदेहली

| | | |
|---|---|---|
| प्रकाशनवर्षम् | : | 2019 |
| अनुकृतय: | : | 200 |
| मुखचित्रविन्यास: | : | डॉ. जितेन्द्रकुमाररायगुरु: |
| अवधातव्यम् | : | शोधपत्रिकायाममुष्यां प्रकाशितशोधपत्राणां मौलिकत्वस्य तत्र प्रतिपादित-विचारस्य च कृते समग्रमुत्तरदायित्वं शोधपत्रलेखकानामेव भविष्यति, न वा सम्पादकस्य न च प्रकाशकस्य भविष्यतीति विज्ञाप्यते। |
| मुद्रणम् | : | RANK PRINTERS, MULUND (W), MUMBAI |



Scanned with OKEN Scanner



# सम्पादकीयम्

**अच्छिन्नस्य ते देव सोम सुवीर्यस्य रायस्पोषस्य ददितारः स्याम।**
**सा प्रथमा संस्कृतिर्विश्ववारा स प्रथमो वरुणो मित्रो अग्निः॥ यजुर्वेद 7.14**

'**सा प्रथमा संस्कृतिर्विश्ववारा**' इति अध्वर्युवेदस्य आर्षोक्त्या भारतीया संस्कृतिः विश्वजनैः वरणीया सेवनीया च विद्यते। सेयं भारतीया संस्कृतिः विश्वजनीना परममहनीया पुराकालात् परमश्रद्धास्थानं बिभ्राणा विलसति। एतस्याः संस्कृतेः आधारभूता संस्कृतभाषा विद्यते। सैषा संस्कृतभाषा भारतस्य प्रतिष्ठाऽपि अस्ति। तथा चोक्तम् -"**भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा**"।

विश्वस्मिन् विश्वेऽनिशं संस्कृतस्य संस्कृतशास्त्राणाञ्च ज्ञानं विज्ञानञ्च विकचीकर्तुं **राष्ट्रियसंस्कृतसंस्थानं** संस्कृतजगति उदयाचलारूढो भानुरिव भृशं भ्राजते । अस्यैव द्वादशसु परिसरेष्वन्यतमः परिसरः मुम्बानगर्यां **राष्ट्रियसंस्कृतसंस्थानम्, क.जे. सोमैया संस्कृतविद्यापीठमि**त्याख्यया प्रथितयशस्कोऽयं वेविद्यते । अत्र साहित्यम्, व्याकरणम्, ज्योतिषम्, शिक्षाशास्त्रम्, मुक्तस्वाध्यायकेन्द्रमिति विभागपञ्चकं विलसति । इह शिक्षाशास्त्रविभागे वर्षद्वयस्य शिक्षाशास्त्रिपाठ्यक्रमे ९७ छात्राः अधीयानाः सन्ति । संस्कृतशिक्षणं शास्त्रशिक्षणं कथं विधेयम्? एतदर्थं शिक्षाशास्त्रविभागः प्राचीनाधुनिकरीतिं समासाद्य शिक्षणम्, अनुसन्धानं , प्रकाशनम् इत्येतत् कार्यत्रयम् अनुतिष्ठति। तत्र प्रकाशनकार्ये **शिक्षारश्मिः** इति वार्षिकी शोधपत्रिका आङ्ग्लहिन्दीसंस्कृतमिति तिसृभिः भाषाभिः भूषिता शिक्षाशास्त्रज्ञानसुषमामाविष्कुर्वती विलसति इति विदितचरमेव प्रेक्षावतां शेमुषीजुषाम्।

शिक्षाशास्त्रमित्युच्यमाने तत्र का नु खलु शिक्षेति स्वाभाविकी जिज्ञासा जागर्त्येव। प्रकृतप्रसङ्गे शिक्षा नाम मानवस्य सर्वाङ्गीणविकासः इति आमनन्ति शिक्षाविपश्चिद्वराः । शीलनिर्माणमेव शिक्षा इति अपरे शिक्षाविदः, उत्तमव्यक्तित्वनिर्माणमेव शिक्षा इति केचित्। उत्तमव्यक्तित्वस्य मूलं कारणं भवति तदीयजनस्य शीलम्। अत एव **सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम्**' इति शीलं परमभूषणत्वेन परिकीर्तितं भर्तृहरिणा नीतिशतके । शिक्षामुखेन शीलं, व्यक्तित्वञ्च संवर्धयितुं शिक्षणकर्मणि मनोवैज्ञानिकप्राविधिकतत्त्वानाम् आलम्बनं नितान्तमपेक्षितम्, अतः सर्वमेतत् मनसि निधाय अमुमेव विषयं केन्द्रीकृत्य देशस्य दिग्दिगन्तरालेषु निवसतां शिक्षाशास्त्रनदीष्णानां संस्कृतशास्त्रसारस्वतसमाराधनतत्पराणां विदुषां नैके शोधलेखाः समधिगताःसन्ति। एतान् सर्वान् महता प्रयत्नेन सुचारुतया सम्पाद्य प्रज्ञाप्रसूतैर्लेखनैर्गुणवतीयं **शिक्षारश्मि**रित्याख्या शोधपत्रिका प्रतिवत्सरमिव अस्मिन् हायनेऽपि प्राकाश्यन्नीयते इति अमन्दमानन्दमनुभवामो वयम् । अत्र विद्यमानं शिक्षाशास्त्रविषयवैविध्यं, भाषावैविध्यं च नूनम् अभिज्ञशास्त्राधिजिगासूनां मनांसि प्रसह्य आवर्जयति इत्यत्र नास्त्यल्पीयान् अपि आरेकः । पत्रिकायामस्यां नैकशास्त्रकोविदैः आचार्यैः, शिक्षाशास्त्रिभिः, शोधच्छात्रैः, छात्राध्यापकैः प्रयत्नेन लिखिताः शिक्षासम्बद्धाः लेखाः प्रकाश्यमानाः सन्ति । प्रयत्नोऽयं कियत्साफल्यमञ्चतीति अथोत्तरं व्यक्तीकर्तुं विद्वद्धौरेया एव प्रमाणम् ।

राष्ट्रियसंस्कृतसंस्थानम् इति मानितविश्वविद्यालयस्य वदान्यैः कुलपतिवर्यैः मान्यैः **परमेश्वरनारायणशास्त्रिभिः** प्रदत्ताशीर्वचनैः, अन्यैः आचार्यैः रातैः शुभाशंसवचोभिः अभिप्रेरणाभिः प्रचोदिताः वयं हर्षातिरेकमनुभवामः ।

परिसरस्य प्राचार्याः **सुदेशकुमारशर्ममहोदयाः**, काले काले समुपदिशन्तः, साहाय्यं कुर्वाणाः जटिलमेतत्कार्यं सरलमकार्षुः। विभागीयाध्यापकाः, छात्राः, कर्मचारिणश्च महता प्रयत्नेन पत्रिकासम्पादनप्रकाशननियोगमिमं द्राक् पूर्णतामनैषुः , अतः सर्वेभ्यः कार्तज्ञ्यवचांसि वितीर्य विरम्यते विस्तरात् ।

डा.देवदत्तसरोदे

Scanned with OKEN Scanner

# विषयानुक्रमणिका


| क्र.सं | शोधपत्रस्य शीर्षकम् | लेखकः | पृष्ठसंख्या |
| --- | --- | --- | --- |
| 1. | शिक्षणाधिगमयोः मनोवैज्ञानिकप्राविधिकतत्वानामनुप्रयोगः | श्री. पी. नागमुनिरेड्डी | 1 |
| 2. | संस्कृतशास्त्रेषु विद्यमानाधिगमतत्वस्य तदुपकारकोपायानाञ्च विचारः | डॉ. देवदत्तसरोदे | 6 |
| 3. | अन्तर्जालाश्रित शिक्षणाधिगमप्रक्रिया | डॉ. हरिप्रसादः के. | 17 |
| 4. | शिक्षणाधिगमयोः मनोवैज्ञानिक-प्राविधिकतत्वानामनुप्रयोगः | डॉ. वेङ्कटरमणभट्टः | 22 |
| 5. | शिक्षणाधिगमयोः प्राविधिकतत्वानां प्रयोगे गुणदोषविमर्शः | डॉ. कुमारः | 25 |
| 6. | व्यक्तित्वम् | डॉ. विनोदकुमारशर्मा | 30 |
| 7. | संस्कृतभाषाधिगमे मोबाइलसहकृतभाषाधिगमस्य अनुप्रयोगः | डॉ. सचिनकुमार | 35 |
| 8. | भाषायाः उद्गमे विविधसिद्धान्ताः | डॉ. बिचित्ररञ्जनपण्डा | 41 |
| 9. | भर्तृहरिकृते वाक्यपदीये भाषावैज्ञानिकतत्वानि | डॉ. मनीषजुगरान | 47 |
| 10. | शिक्षणाधिगमयोः मनोवैज्ञानिकप्राविधिक-तत्वानामनुप्रयोगे शिक्षकः | डॉ. डम्बरुधरपतिः | 57 |
| 11. | शिक्षणाधिगमप्रक्रियायाम् अधिगमसिद्धान्तानां विनियोगः | डॉ. रुद्रनारायणनरसिंहमिश्रः | 62 |
| 12. | शिक्षणाधिगमयोः शास्त्रेषु उपनिषत्सु च वर्णिताः मनोवैज्ञानिकाभिगमाः | डॉ. गणपति वि. हेगडे | 66 |
| 13. | भारते अध्यापकशिक्षा | डॉ. महेशकुमारपाणिग्राही | 73 |
| 14. | साम्प्रतिकशिक्षाक्रमे मूल्यसम्वर्धने गैर्वाण्याः उपादेयता | डॉ. प्रभलविद्याधरः | 83 |
| 15. | शिक्षणकर्मणि अन्तर्जालस्य विनियोगः | Dr. S.T.P Kanakvali | 88 |
| 16. | शिबिरविधिः | एस्.वैष्णवी | 95 |
| 17. | शारीरिक शिक्षा में आईसीटी | Dr. Shankar B. Andhale | 101 |
| 18. | Implematation of Inclusive Education in India : Issues and Challenges | Dr.V.S.V. Bhaskar Reddy | 106 |

# व्यक्तित्त्वम्

✍ डॉ. विनोदकुमारशर्मा *

**Personality is the dynamic organization within the individual of those Psychophysical systems that determine his unique adjustment to his environment. Gordon Allport**

विपूर्वक-अञ्जधातोर्निष्पन्नम् व्यक्तिरिति इदं पदम्, यत् वस्तु अभिव्यक्तं सत् दृष्टिगोचरो भवति तत् कथयति। घटपटादयोऽजीवाः पदार्थाः पशुपक्ष्यादयः सजीवाः पदार्थाश्च अस्य पदस्याभिधेया भवन्ति सर्ववाचकमपि इदं पदमत्र मनोविज्ञाने प्रकरणवशात् मानवव्यक्तिरेवाभिदधाति। तथा च व्यक्तिपदेन पृथक् स्थितो मानवः अभिप्रेयते। तस्य यो भावः वर्तते असाधारणः स एव व्यक्तित्वपदेनोच्यते।

मेषैः सह परिचयहीनानामस्माकम्, शाव्दलेषु शाद्वं चरन्तः सर्वेऽपि मेषाः समाना एव भान्ति मेषत्वजातिं दृष्ट्वा इमे मेषा इति जानीमः। मेषपालस्तु स्वकीयस्यैकैकस्यापि मेषस्यासाधारणं धर्मं (चिह्नं) अपि जानाति। अत एव संभूय चरतां स्वमेषाणां अन्यमेषाणां च मध्ये स्वकीयान् मेषान् सायं पृथक्कर्तुं शक्नोति सः। एवं एकैकं मेषं पृथक सूचयितुं यो धर्मो वर्तते तस्य धर्मस्य व्यक्तित्वम्, व्यक्तिः अथवा पृथगात्मकता इति नाम। अमरकारः, **जातिर्जातं च सामान्यं व्यक्तिस्तु पृथगात्मता** इत्याह व्यक्तिशब्दः, धर्मिवाचित्वेन धर्मवाचित्वेनापि दृष्टः। अथापि स्पष्टप्रतिपत्त्यर्थं व्यक्तित्वमिति पदमेवात्र धर्मवाचित्वेन उपयुज्यते।

लोके जनाः व्यक्तित्त्वम् उदाहरन्ति। समाजे राष्ट्रे व्यक्तित्त्वं पश्यन्ति। चरित्रं प्रशसन्ति। समाज मूल्यानि स्थापयितुम् आदिकविना वाल्मीकिना आदिकाव्यं रामायणं यदा रचितं तदा मुनिपुङ्गवं नारदं पृच्छति यथा –

**तपः स्वाध्यायनिरतं तपस्वी वाग्विदां वरम्।**
**नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम्॥**
**कोऽन्वस्मिन् साम्प्रतं लोके गुणवान् कश्च वीर्यवान्।**
**धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः॥**
**इक्ष्वाकुवंशप्रभवो रामो नामा जनैः श्रुतः।**
**नियतात्मा महावीर्यो द्युतिमान् धृतिमान् वशी॥**

लक्षाधिकाब्दाः गतानुगतिकतया गताः परन्तु श्रीरामचन्द्रस्य व्यक्तित्त्वम् अधावधि प्रासङ्गिकं सान्दर्भिकं चास्ति।

श्रीमद्भगवद्गीतायां भगवता श्रीकृष्णेन शोभनव्यक्तेः स्वरुपं निरूपितम् –

* संविदाध्यापकः, शिक्षाशास्त्रविभागः, राष्ट्रियसंस्कृतसंस्थानम्, (मा.वि) मुम्बई परिसरः।

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।

युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ।।

तत्रैव स्थितप्रज्ञस्य स्वरूपम् अपि वर्णितम् –

स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ।

स्थितधीः किं प्रभाषेत किमासीत् व्रजेत किम् ।।
प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ।।
दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ।।
यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् ।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ।।

रघुवंशमहाकाव्ये दिलीपं वर्णयन् कालिदासःविरुद्धगुणानामपि तस्मिन् संकलितत्त्वं कथयति –

ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः ।

गुणाः गुणानुबन्धित्त्वात् तस्य सप्रसवा इव ।।

जगति जातः एकैकोऽपि मानवः इतरमानवसाधारण गुणात् काश्चित् दधदपि, स्वासाधारणानपि काश्चन धर्मान् धत्ते एव । एवं व्यक्तौ मानवे स्थिताः ये साधारणा असाधारणाश्च गुणाः ते तं अन्येभ्यो मानवेभ्यः पृथक् कृत्वा प्रदर्शयन्ति इति तेषां धर्माणां समुदायः एव मानवगतव्यक्तित्वेन अवगम्यते ।

पदनिष्पादनप्रक्रियायां ज्ञातायामपि व्यक्तित्त्वस्य वास्तविकं स्वरूपमधिकृत्य लक्षणादिभिरपि ज्ञातव्यमेव । आङ्ग्लेय्याम् एतत्समानार्थकं पदं पेर्सनालिटि (personality) इति वर्तते । इदं पदं पेर्सोना (persona) इति ग्रीकभाषापदात् निष्पन्नम् । पूर्वं नटाः स्वगृहीतपात्रानुगुणं मुखावरणम् (mask) किमपि धृतवन्तः । मुखावरणवाचि इदं पदं पश्चात् तत्पात्रगुणवाचि अभवत् । कालक्रमेण, मानवानां ये असाधारणा गुणा वर्तन्ते तद्वाचि जातम् ।

व्यक्तित्त्वस्य लक्षणं दुर्वचम् । आलपोर्ट (Allport) नामा मनोविज्ञानी कश्चित् व्यक्तित्त्वं स्वकीयग्रन्थे पञ्चशता लक्षणैः लक्षितवान् । अस्य पदस्यार्थस्तु विपुलो वर्तते । मानवस्य शोभनमाकारं क्वचित् सूचयति । क्वचित् दक्षतामपि । क्वचित् मानवगतान् विशिष्टान् धर्मान । एकैकोऽपि मानवः स्वसाधारण्या प्रक्रियया कार्यं करोति,अन्यैः सह व्यवहरति च । एवं क्रियमाणः व्यवहारः मानवस्य व्यक्तित्त्वं प्रकाशयितुमलं भवति । मानवेषु केचन भीताः । केचन निर्भीकाः । केचनाग्रहिणः सन्तः स्वाभिप्रायमेव परेषु



Scanned with OKEN Scanner

महत् स्थानं वहति । कस्यापि अतिकानुकम्पनम्, अन्यस्य किंगालित्वम् इति इदमुभयमपि इदानीं ग्रन्थिकार्येण ज्ञायते शरीरतन्त्रविज्ञाने ।

एवं परिवेशोऽपि व्यक्तित्वे कारणं भवति । कुटुम्बस्थितिः मातापित्रोः संस्कृतिमत्त्वम्, कुटुम्बवातावरणे प्रीतिपूर्णत्वम्, शालायां सुहृदामुपाध्यायानां च प्रीतिश्चापि, विद्या, धनस्वभावः इत्येते सर्वेऽपि व्यक्तित्वे कारणानि । यद्येतानि समीचीनानि भवन्ति तर्हि व्यक्तित्वमपि समीचीनं स्यात् । कुटुम्बे कलहः, अप्रीतिः, दुःसहवासः, दुर्मैत्री, दुरुपाध्यायाः इत्यादयः बालानाम् असमीचीनव्यक्तित्वे कारणानि भवन्ति । बाल्ये एव समीचीन व्यक्तित्वप्राप्त्यर्थं बाला उपकर्तव्या उपाध्यायैः ।

- व्यक्तित्वप्रभेदाः -

जगति यावन्तो मानवाः सन्ति तावन्तः व्यक्तित्वप्रभेदाः वर्तन्ते । अथापि, यथा नैयायिकाः जगति स्थितान् सर्वानपि पदार्थान् सप्तधा व्यभजन् तथा विज्ञानिनोऽपि व्यक्तित्वं स्वाभिमतधर्मानुसारेण व्यभाजुः । भगवान् गीतायां सत्त्वरजस्तमोरूपगुणभेदेन तद्वन्तो मानवाः सात्त्विकाः, राजसाः, तामसा इति त्रेधा विभेजे । आयुर्वेदीयाश्च वातपित्तकफरूपधातुत्रयं पुरस्कृत्य व्यक्तित्वं अवर्णयन् । ज्योतिश्शास्त्रविदः जन्मराश्यनुगुणं व्यक्तित्वं द्वादशधा कल्पयन्ति ।

प्राचीनकाले ग्रीसदेशे स्थितः हिप्पोक्रेट्स् (Hippocrates, 400 BC) नामकः भिषक् शरीरधातूनां स्वभावविशेषान् पुरस्कृत्य चतुर्धा मानवान् विभजते स्म ।

पैत्तिकः Choleric – अयं क्रोधशीलः स्यात् ।

विषादीMelanchalic– विषदनशीलः ।

श्लैष्मिकः Phlegmatic– स्वापशीलः, तन्द्रालुः ।

सुप्रत्याशी Sanguine - उत्साहवान्, हास्यप्रियः भवति ।

विलियमजेम्सनामकः विज्ञानी मृदुमनसः(Tender-minded) कठिनचित्ताः (Tough-minded) इति मानवान् द्वेधा व्यभाक्षीत । मृदुमनसः शास्त्राध्ययनादिषु व्यापृता भवन्ति, कठिनचित्तास्तु कार्यकरणे कुशला वर्तन्ते इत्याह ।

क्रेश्मर (Kretschmer 1888-1964) नामकः जर्मन्देशीयः आधिभिषक् शरीरं निमित्तीकृत्य व्यक्तित्वसिद्धान्तं कमपि कथयति –

कृशकायाः Asthenic

तुन्दिलाः Pyknic type

युङ्गमहाशयश्च, बहिर्मुखा Extroverts, अन्तर्मुखाः (Introverts) इति द्वेधा मानवान् वर्गीकरोति। स्प्रैंग (Spranger) नामा विज्ञानी मानवान् तत्तत्स्वभावानुगुणं षोढा (1909) विभजते। ते एते भवन्ति –

सैद्धन्तिकाः The Theoretical

आर्थिकाः The Economic

कलारसिकाः The Aesthetic

सामाजिकाः The Social

नैतिकाः The Ethicals

धार्मिकाः The Religious

शेल्डन (Sheldon) नामा कश्चन विज्ञानी शरीरसंस्थानानुगुणं मानवानां व्यक्तित्त्वं निश्चिनोति स्म। केषाञ्चन उदरादिकम् अतिमात्रं विशालं वर्तते। एते विशालोदरा इति निर्देष्टुमर्हाः। सुखप्रिया भवन्ति स्म। केचन कृशाङ्गा वर्तन्ते। एते चिन्तनशीलाः भवन्ति। केषाञ्चित् मांसलत्वं स्यात्। एते साहसप्रियाः कार्येषु व्यग्राः भवेयुः।

**********


**सन्दर्भग्रन्थाः –**

रामायाणम् – महर्षिवाल्मीकिः।

श्रीमद्भगवद्गीता (भीष्मपर्वणि) महाभारतम् – महर्षि वेदव्यासः।

रघुवंशमहाकाव्यम् – महाकविकालिदासः।

शिक्षामनोविज्ञानम् – वे. श्री. वेङ्कटराघवाचार्यः।

ख्यातं राष्ट्रियसंस्कृतं सुमहितं संस्थानमद्याखिलं
वाणीवैभवमातनोति नितरां राष्ट्रे चतुर्दिग्भवम् ।
तत्रासौ निजगौरवेण महता सारस्वतं भासयन्
सोमय्याभुवि भासते परिसरो विद्याविहारे स्थितः ॥

शिक्षाशास्त्रविभागः

# राष्ट्रियसंस्कृतसंस्थानम्

(मानितविश्वविद्यालयः)

के.जे. सोमैयासंस्कृतविद्यापीठम्

विद्याविहारः, मुम्बई - ७७

Scanned with OKEN Scanner

UGC Approved Journal No. 40920

ISSN 2277-6443

सप्तमोऽङ्कः, 2018-19

विश्वविद्यालयानुदानायोगद्वारा स्वीकृतशोधपत्रिकासूच्यन्तर्गता

# विद्यारश्मिः

समीक्षिता मूल्याङ्किता च वार्षिकी राष्ट्रियशोधपत्रिका

A Peer Reviewed Refereed Annual National Research Journal

वेदर्चामर्चयन्तस्स्मृतिचयवचनं तत्त्वतश्चर्चयन्तः,
शास्त्रान्तःसंस्पृशन्तोऽमृतगतिमतिदं दर्शनं दर्शयन्तः ।
साहित्यं स्वादयन्तस्सहृदयवसतौ भासमुद्भासयन्तो
विद्याया रश्मयो ज्ञान् पिपुरतु सुधियां शेमुषीमेधयन्तः ॥

प्रधानसम्पादकः
प्रो. सुदेशकुमारशर्म्मा

सम्पादकः, संयोजकश्च
प्रो. बोधकुमारझाः

राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)
क.जे. सोमैयासंस्कृतविद्यापीठम्
विद्याविहारः, मुम्बई - 77

Scanned with OKEN Scanner

UGC Approved Journal No. 40920

ISSN 2277-6443

सप्तमोऽङ्कः, 2018-19



विश्वविद्यालयानुदानायोगद्वारा स्वीकृतशोधपत्रिकासूच्यन्तर्गता

# विद्यारश्मिः

समीक्षिता मूल्याङ्कता च वार्षिकी राष्ट्रियशोधपत्रिका

**A Peer Reviewed Refereed Annual National Research Journal**

वेदर्चामर्चयन्तस्स्मृतिचयवचनं तत्त्वतश्चर्चयन्तः,
शास्त्रान्तःसंस्पृशन्तोऽमृतगतिमतिदं दर्शनं दर्शयन्तः ।
साहित्यं स्वादयन्तस्सहृदयवसतौ भासमुद्भासयन्तो
विद्याया रश्मयो ज्ञान् पिपुरतु सुधियां शेमुषीमेधयन्तः ॥

**प्रधानसम्पादकः**

प्रो. सुदेशकुमारशर्म्मा

**सम्पादकः, संयोजकश्च**

प्रो. बोधकुमारझाः

**राष्ट्रियसंस्कृतसंस्थानम्**

(मानितविश्वविद्यालयः)

क.जे. सोमैयासंस्कृतविद्यापीठम्

विद्याविहारः, मुम्बई - 77

# शोधपत्रानुक्रमणिका



| क्र. सं. | शोधशीर्षकम् | लेखकः | पृष्ठाङ्कः |
|---|---|---|---|
| 1. | शिक्षानीतिः सुखावहा | प्रो. कमलाकान्तत्रिपाठी | 01 |
| 2. | नामार्थविमर्शः | प्रो. प्रकाशचन्द्रः | 07 |
| 3. | वैद्यके पतञ्जलीयस्य वैशिष्ट्यम् | प्रो. ई. एस्. राजन् | 13 |
| 4. | Curiosity : A Source of Research | Prof. D. N. Pandey | 23 |
| 5. | 'कर्तुरीप्सिततमं' सूत्रशास्त्रार्थः | प्रो. बोधकुमारझा | 35 |
| 6. | रसानां सुखदुःखात्मकत्वं | प्रो. अर्चना दुबे | 48 |
| 7. | वर्णान्तरत्व के सिद्धान्त | आचार्य उदयन मीमांसक | 52 |
| 8. | संस्कृतशास्त्रशिक्षणे अन्वयविधेरनुप्रयोगः | डॉ. रा. गा. मुरलीकृष्णः | 64 |
| 9. | शास्त्रतत्त्वसुखबोधाय तन्त्रयुक्तयः | डॉ. देवदत्तसरोदे | 74 |
| 10. | भाषोत्पत्तिसिद्धान्ताः संस्कृतञ्च | डॉ. कुलदीपशर्मा | 84 |
| 11. | शिक्षायां भूमण्डलीकरणस्य प्रभावः | डॉ. वी. एस्. वी. भास्कररेड्डी | 91 |
| 12. | नारायणीयकाव्ये लक्ष्ये वस्त्वलङ्कार-रसानुमितिलक्षणानि | डॉ. नारायणन् ई. आर्. | 97 |
| 13. | व्याकरणदिशा पुरुषार्थविमर्शः | डॉ. दयारामदासः | 105 |
| 14. | शब्दनित्यत्ववादः | डॉ. मधुकेश्वरभट्टः | 112 |
| 15. | भासनाटकेषु स्त्रीपात्राणि समायोजनस्य उत्कृष्टोद्भरणानि | डॉ. लीना सक्करवालः | 115 |
| 16. | शब्दार्थसम्बन्धविमर्शः | डॉ. सुभाषचन्द्रमीणा | 122 |
| 17. | कार्यशब्दवादे इदम् | डॉ. सुधाकरमिश्रः | 127 |
| 18. | अलङ्काराणामलङ्कारत्वम् | डॉ. स्वर्णकुमारमिश्रः | 133 |
| 19. | संयुक्त राष्ट्रसंघ में हिन्दी की स्थिति का मूल्यांकन | डॉ. गीता दुबे | 138 |
| 20. | Colonial Alienation in Ngugiwa Thiong 'O's Decolonising the Mind | Dr. Shweta Sood | 143 |



Scanned with OKEN Scanner

| क्र. सं. | शोधशीर्षकम् | लेखकः | पृष्ठाङ्कः |
|---|---|---|---|
| 21 | वर्तमान परिदृश्य में भारत-नेपाल सम्बन्ध | डॉ. रञ्जय कुमार सिंह | 149 |
| 22 | प्रातिपदिकार्थविचारः | डॉ. नवीनकुमारमिश्रः | 155 |
| 23 | अनुसन्धानस्यार्थविमर्शः | डॉ. विनोदकुमारशर्मा | 163 |
| 24 | शिक्षासामाजिकपरिवर्त्तनञ्च | डॉ. मनीषकुमारचाँडकः | 168 |
| 25 | समावेशिशिक्षायाः समस्याः सम्भावनाश्च | डॉ. सचिनकुमारः | 173 |
| 26 | द्व्यर्थो धातुः | ब्र. अजयः | 180 |
| 27 | कारकत्वं प्रातिपदिकार्थत्वञ्च | डॉ. माधवदत्तपाण्डेयः | 187 |
| 28 | Terrorism in South Asia | Dr. Suman Singh | 191 |
| 29 | धर्मशास्त्रोक्तदृशा अशौचनियमाः | डॉ. जितेन्द्रकुमाररायगुरुः | 197 |
| 30 | 'अक्षरवैदर्भी' या नियतकालिकाचे वाङ्मयीन योगदान | डॉ. मिनाक्षी बर्‍हाटे | 201 |
| 31 | वास्तुशास्त्रदृष्ट्या गृहदोषनिरूपणम् | डॉ. अनिरुद्धनारायणशुक्लः | 204 |
| 32 | शारीरिक स्वास्थ्य एवं योग, एक अध्ययन | डॉ. शंकर बाबुराव आंधळे | 210 |
| 33 | तार्किकमतनिरसनपूर्वकः स्फोटविमर्शः | सुश्रीविदुषीबोल्ला | 216 |
| 34 | Polymorphism and Overloading | Miss Vaishali Nivdunge | 226 |
| 35 | शतरुद्रियस्य वैषयिकाधाराः | श्री. सत्यराजरेग्मी | 231 |
| 36 | Contemporary Scenario of Sanskrit Education in Schools & its New Diamensions | Namrata Patel | 238 |
| 37 | शास्त्रपठनदोषाणां निवारणे कूटचित्राणामनुप्रयोगः | अमृता कौर | 244 |

# अनुसन्धानस्यार्थविमर्शः

प्रो.डॉ. [illegible]

([illegible] अनुसन्धानम् । [illegible] ... इति [illegible] । [illegible] इति [illegible] । [illegible] इति [illegible], [illegible] । [illegible] इति [illegible] । [illegible] अनुसन्धानम् । [illegible] । अनेनैवाशयेन [illegible] लेखो [illegible] अनुसन्धान-[illegible]-डिस्कवरी-एक्सप्लोरेशन[illegible] । [illegible] विद्यते ॥ - सं.)

बुद्धियुक्तमानवः सर्वदा बुद्ध्या अनुसन्दधानो भवति । स पूर्वतनं पश्यति, वर्तमानं निर्णयति, भविष्यञ्च अनुमिनोति । अस्माकं प्राचीनाचार्याः ज्ञानस्य सम्पूर्णप्रक्रियां त्रिषु स्तरेषु व्यवस्थितां कृतवन्तः ।

'आदौ शोधस्ततो बोधः प्रबोधश्चाप्यनन्तरम्' अर्थात् सर्वप्रथमं ज्ञानस्य तदनन्तरः शोधः तदनन्तरं श्रेष्ठगुरूणां प्रवचनेन बोधः, अन्ते च अनुभूतिः भवति । इत्थं शोधस्य अनुसन्धानस्य वा 'ज्ञानस्य पिपासा' मूलमिति वक्तुं शक्नुमः । ज्ञानपिपासां विना कथं कश्चित् पठिष्यति लेखिष्यति ?

द्वादश्यां शताब्द्यां लब्धजन्मा कान्यकुब्जेश्वरस्य जयचन्द्रस्य राजकविः नैषधीयचरित-महाकाव्यस्य प्रणेता महापण्डितः श्रीहर्षः विद्यायाः (ज्ञानस्य) चतस्रः अवस्थाः सन्तीति ब्रवीति -

> अधीतिबोधाचरणप्रचारणैर्दशाश्चतस्रः प्रणयन्नुपाधिभिः ।
> चतुर्दशत्वं कृतवान् कुतः स्वयं न वेद्मि विद्यासु चतुर्दश स्वयम् ॥

श्लोकेऽस्मिन् राज्ञः नलस्य चतुर्दशविद्याः वर्णयन् तस्य श्रीहर्षः क्रमिकस्थितीनां प्रसङ्गे वर्णयति - अधीतिः (Perusal or Study), बोधः (Digestion or Experience), आचरणम् (Application) तथा प्रचारणम् (Teaching or deliverance) । भारतीयभाषासु प्रयुक्तोऽयम् अनुसन्धानशब्दः आंग्लभाषाया Research 'रिसर्च' शब्दस्य स्थाने तदर्थबोधाय अनुसन्धानम्, गवेषणा, शोधः, संशोधनम् इत्यादयो विविधाः शब्दाः प्राप्यन्ते । एतेषु व्युत्पत्त्यर्थदृष्ट्या अनुसन्धान-शब्दो मूलशब्दार्थं सर्वाधिकं निर्वहति । अतः मूलशब्दस्य सर्वाधिकनिकटः अयं शब्दः । अत्र हि Re 'रि' अनुपर्याय: Search 'सर्च' संधानार्थकश्चेति ।

यद्यपि प्रतिपदमात्मनः विशेषमन्तर्भूतं रहस्यं तात्पर्यञ्चावधारयति, तथापि मुख्यशब्दस्य पर्यायवाचिनः शब्दाः यद्यपि स्वस्वरूपं धारयन्ति, पदार्थञ्चापि प्रकटयन्ति तदनुसारम् । तथापि

कस्मिंश्चिदर्थे मुख्यशब्देन सह तात्पर्यसंवादं प्रकटयन्त्येव । अतोऽत्र 'शोध:' इति पदस्य पर्यायवाचिन: अन्ये शब्दा: प्रस्तूयन्ते -

1. अनुसन्धानम् -

सन्धानं[1] भवति द्वयो: वस्तुनो: बहूनां वा पदार्थानाम व्यवस्थितानां व्यवस्थितीकरणम् । तद् व्यवस्थायां या काचित् प्रक्रिया स्वीक्रियते, प्रयासो वा विधीयते तद्‌नुसन्धानम् ।[2] अन्यत्र भवत्यर्थो लक्ष्यसाधनम् । यथाऽभिज्ञानशाकुन्तले कविकुलगुरु: कालिदासो निरूपयति वस्तु दुष्यन्तद्वारा इति शरसन्धानं नाटयति - इति । तथैव निम्नोन्नभावस्य पृथिव्या: वा निम्नोन्नताया: समताविधानेऽप्येष शब्द: सन्धानमित्युच्यते - यथा तत्रैवाभिज्ञानशाकुन्तले - 'यदर्धं विच्छिन्नं भवति कृतसन्धानमिव तत्' - 1/9

2. अन्वेषणम् -

अन्वेषणशब्दोऽपि शोध-शब्दस्य पर्यायेऽर्थे गण्यते । यद्यपि शब्दोऽयं भौगोलिकानुसन्धानार्थं, कदाचिद्वैज्ञनिकानुसन्धानार्थं, विशेषरूपेण प्रतिपादयति, तथापि गौणरूपेण साहित्यक्षेत्रीयसमाजशास्त्रीयादिविषयकशोधकर्मणेऽपि शब्दोऽयं प्रयुज्यते । केषाञ्चिन्मतमस्ति यत् अस्य अंग्रेजी-शब्दोऽस्ति डिस्कवरी (Discovery) इति उदाहरणानि खलु अन्वेषणस्य मन्यन्ते तै: कोलम्बसेनान्विष्टो देश: अमेरिका, जेम्सवाटस्य रेलयान-इञ्जनम्-इत्यादि । एकेषां मतमिदमस्ति यदन्वेषणशब्द: साहित्यिकसम्पद: संशोधनविषये न प्रवर्तते । परन्त्वेषा धारणा न समीचीना प्रतिभाति - यतो हि साहित्यिकक्षेत्रेऽपि सूक्ष्मनिरीक्षणपरिशीलनादिव्यापारेण कस्यचिन्नूतनस्य पदार्थस्यप्रस्तुतिर्भवत्येव । कश्चिदपि शब्द: पारिभाषिकशब्दो वा प्रतीको भवति विशेषपदार्थावगमनस्य । अत एव काव्यशास्त्रे साक्षात्संकेतितशब्दस्य व्यवहारोऽभिधासूचनाय प्रयुक्त: ।[3] अस्य तात्पर्यमिदमस्ति यत् विशेषो हि शब्द: विशिष्टपदार्थस्याकारात्मकं स्वरूपं संकेतयति यथा अस्मात् पदादयमर्थो बोद्धव्य इति ईश्वरसंकेत: शक्ति: ।[4] तस्मात् तच्छब्दशक्त्यनुसारमेव मनासि पदार्थाकारो हि प्रादुर्भवति इति । तस्मात् अन्वेषणशब्दोऽपि विद्यतेऽनुसन्धानशब्दस्य पर्याय इति कथने न संकोच: ।

3. गवेषणा -

प्राक्तनकाले शब्दोऽयं गवामन्वेषणे प्रयुज्यते स्म इति एकेषां विदुषां मतम् । व्युत्पत्तिदृशा समालोचनेनास्य शब्दस्य तदेवार्थं साधयितुं शक्यते तथा चात्र भावोऽस्ति-विलुप्त-वस्तुन: सूक्ष्मतयाऽवलोकनम् - यथा गोपालक: गामन्वेष्टि वने । एतस्य शब्दस्यापि शोधार्थ: भवितुमर्हति यतो हि आधुनिक-शोध-प्रविधौ बहुविधा: शोधप्रकारा: मन्यन्ते । तत्र इतिहासपुराणादिगतानां शब्दसंकेतमाध्यमेन भौगोलिकतथ्यान्वेषणमस्मिन् क्षेत्रे खल्वागच्छति तत्र मन्ये, ऐतिहासिक-भौगोलिक-परिवर्तनेन शब्दसंकेतितस्थलानामन्येषाञ्च पदार्थानां सम्यक्तया अन्वेषणं, संशोधन वा उदाहरणं भवति । यथा, रामसेतुस्थलस्यान्वेषणप्रसङ्ग: । साहित्य-भाषा-संशोधनविषयेष्वप्ययं शब्द: स्वकीयां प्रवृत्तिं द्योतयति तथापि



Scanned with OKEN Scanner

सम्प्रतिशोधपर्यायरूपेणास्य प्रयोगो न दृश्यते शोधसंस्थानेषु । अत एषः शब्दः स्वकीयं शोधस्वरूपं इदानीं त्यक्तवान् अस्तीति दृश्यते । क्वचिदेवास्य शोधपत्रिकानामकरणे प्रयोगो दृश्यते न सर्वसामान्यरूपेण ।

उपर्युक्ताः शब्दाः संशोधनस्य पर्यायत्वेन ये प्रोक्ताः तेषां तात्पर्यमस्ति केनचिदपि माध्यमेन नूतनवस्तुनः संशोधनमाध्यमेनावाप्तिरेव । गवेषणसन्दर्भेऽपि तथैवास्ति । अर्थात् गोपालकेन क्वचिद् विलुप्तगोरन्वेषणप्रसंगेऽपि अटता तेन मार्गे कस्यचिन्नूतनस्य वस्तुनः प्राप्तिर्यदा जायते तदाऽस्य शब्दस्य शोधपर्यायत्वेन ग्रहणं शक्यमस्ति ।

तत्र चोपलब्धसाहित्यस्य परिशीलनेन, विस्तृतविवेचनेन गभीरालोचनपद्धत्या वा तात्पर्यावगमनं मुख्यसन्देशस्य च या प्राप्तिर्भवति साप्येकधाराऽनुसन्धानक्षेत्रस्याद्य प्रवहन्ती दृश्यते।

4. **अनुशीलनम् -**

एष शब्दः प्रवर्तते अन्वेषणीये संशोधनीये वा साहित्यिक विषये । विशेषोद्दिष्ट-पदार्थप्रकृतिज्ञानस्य आधारेण नैकविषयदृष्ट्या, साहित्यशास्त्रे कविहृदय-प्रकृतिज्ञानाय शब्द-गत-शक्ति-सामर्थ्य-बलाद् यत्किञ्चिदपि चिन्तनं सप्रमाणं तार्किकरूपेण विधीयते, तदनु-शीलनं समीक्षाया एकः प्रकारः, अनुसन्धानशब्दपर्याय-रूपेणावगन्तुं शक्यते । 'विज्ञातसारा-न्यतानुशीलनेन' इति भारवेः वचनेनापि तदेव-भावोऽवगम्यते । कस्मिंश्चिदर्थे परामर्शः विमर्शः परिशीलनादिशब्दा अपि कला विषयकानुसन्धानक्षेत्रमेव सूचयन्ति, तस्मादेतेऽपि शब्दा अनुसन्धानशब्दपर्यायाः, शोध-पर्याया वा स्वीकर्तुं शक्यन्तेऽवस्थाविशेषस्य विशेष-चिन्तनमननाध्ययनसन्दर्भे, काव्यसौष्ठवस्य, ध्वनिविशेषस्य, भावनाविशेषस्य, तात्पर्यविशेषस्य च अवकलनाय साहित्यक्षेत्रेऽनुसन्धानसन्दर्भे च ।

5. **समीक्षा** - शब्दे किञ्चिद्विशेषोऽस्ति । अत्र समीक्षासन्दर्भे सर्वतोभावेनानुसन्धेयविषयस्य प्रतीकशब्दानां चिन्तनं विधीयते, विशेषसन्देशावगमनाय च ताटस्थ्यभावेन अनुसन्धेय-विषयस्याध्ययनं, मननं, चिन्तनं च विधीयते ।

6. **आलोचनाऽपि** शोधविषस्य शीर्षकस्थानीयः शब्दो विद्यते । आलोचनायाः प्रायः व्यावहारिकक्षेत्रे नकारात्मकं रूपं मन्यते परन्तु तस्य शब्दस्य व्युत्पत्त्यनुशीलनेन न तथाऽर्थमनुसन्धानकर्मणि कर्तुं शक्यते । अनुशीलने, परिशीलने, समीक्षायामालोचने च सर्व-त्रैव ताटस्थ्यभावेन, तार्किकरूपेण, वैज्ञानिक-प्रकारेण चिन्तनं क्रियते विषयस्य । यद्यपि साक्षाद्रूपेणात्र वैज्ञानिकदृष्टेः प्रतीतिः न भवति, परन्तु यदा वैज्ञानिकसंसाधनानामुपयोगेन साहित्यसम्पदः परिशीलनं विधीयते तदास्याः प्रतीतिर्भवति । आधुनिकानुसन्धानसंस्कृतौ सर्वत्रैवानुसन्धानपद्धतेः उपयोगात्, संसाधनानाञ्च प्रयोगात् समीक्षादिप्रकारा अपि खल्वनु-सन्धानस्य वैज्ञानिका एव मन्यन्ते । उदाहरणार्थं यदि कविकुलगुरुकालिदासविरचितस्य मेघदूतस्य समालोचनात्मकमध्ययनमनुसन्धानदृष्ट्या विधीयेत तदा मानवमनोविज्ञानपरीक्षण-

साधनानामन्येषाञ्च वैज्ञानिकसंसाधनानामुपयोगः भविष्यत्येव । तस्मात्-समीक्षात्मकाध्ययने शास्त्रान्तरपदार्थसिद्धये वैज्ञानिकी दृष्टिस्तु भवत्येव ।

अन्ये चानुसन्धानार्थज्ञापकान् पर्यायान् वयं यथा जानीमो यदस्माकं प्राचीन-संस्कृतभाषासाहित्ये सर्वाः विद्याशाखाः वैश्विक-शिक्षण-परिभाषिकाश्च शब्दाः विराजमानाः सन्ति, परन्तु तिलेषु तैलं यथा व्याप्तं दृश्यते, तत्कुट्टन-निश्च्योतन-माध्यमेन च प्रत्यक्ष-मुपस्थितं भवति, तद्वदेवास्माकं शास्त्राणि तिलस्थानीयानि सन्ति, येषां विशेषशास्त्रम-न्थनधिया, परीक्षणं क्रियते तदाऽभीष्टमुपलभ्यते । अतः आधुनिक-संशोधनसूचना-संवाहक-शब्देषु, डिस्कवरी इनवेन्सन, रिसर्चादयोऽपि शब्दाः यान् यान् अर्थान् नीत्वा प्रवर्तिताः प्रतिभान्ति ते ते अर्था खलूपर्युल्लिखितेषु शोधपर्यायेषूपलभ्यन्ते तथापि आङ्गलभाषीया अपि शोध-पर्यायवाचिनो हि शब्दा अत्र पाठकानां समक्षं सपरिशीलनं प्रस्तूयन्ते-

7. डिस्कवरी (Discovery) -

डिस्कवरीति शब्दः ददाति सन्देशं तद्वस्त्वन्वेषणस्य, यस्योपरि विद्यते ह्यावरणम्। अस्य सूत्रं वेदान्तशास्त्रस्यावरणशक्तिविचारे प्राप्तुं शक्यते । **'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः'** इति वाक्यं स्पष्टं तदेवाङ्लभाषीयं डिस्कवरीति शब्दार्थं सूचयति । तत्र वेदान्तशास्त्रेऽपि मायाया आवरणशक्त्या वस्तुनः जीवात्मनः प्रकाशः तिरोहितो जायते । यदा ज्ञानेन तत्त्वमसीति महावाक्यस्य तात्पर्यज्ञानेन, तथा च 'अहं ब्रह्मास्मि' - इति खल्व-नुभववाक्येन साधकः स्वं-स्वं रूपमवधारयति तदा सर्वमावरणं निरस्तं भवति । डिस्कवरीतिनाम्नाख्यातेऽनुसन्धानेऽपि कस्यचिदपि दूरस्थस्य वस्तुनः भौगोलिकप्राकृतिक-वातावरणेन अन्येन केनचित् कारणेनावृतं स्वरूपमुद्घाट्यते । आध्यात्मिक-क्षेत्र-सम्बद्धमिव प्रतिभाति Discovery (डिस्कवरीति) पदम्, यस्य तात्पर्यमिदं भवति यत् केनचित् कारणेन स्थितमपि वस्तु सरलतया नावलोक्यते, परन्तु कञ्चित्संकेतं लक्षणं वा मनसि धृत्वा समुचित-साधनेन यदा तस्योद्घाटनं भवति तदस्ति डिस्कवरी-पदार्थ-फलम् ।

आइनस्टीन-महोदयोऽपि तदेव संकेतयति, परन्तु तस्य सिद्धान्ते विशेषोऽस्ति यत् उपनिषदां भावानुसारं कस्यचिदपि पदार्थानुसन्धानेऽन्तःप्रज्ञैव कारणमस्ति-यथा 'Einstein very emphatic-cally pointed out that scientific laws may be discovered only through intuition'[5].अतः इन्वेन्सनशब्दोऽपि तथैवानुसन्धानस्य तात्पर्यं धत्ते यथा डिस्कवरीति पदं धारयति। किञ्चिद्विशेषोऽस्ति (Invention) इन्वेनसनपदे यदयं शब्दः साहित्यकलाक्षेत्रे कल्पना-प्रकारमपि खल्वनुसन्धानस्य परामृशति । अनेन प्रकारेणानुसन्धानतत्त्वार्थप्रतिनिधिशब्दा अन्येऽपि 'एक्सप्लोरेसन' (Exploration) इत्यादयः सन्ति, येषां विश्लेषणेनानुसन्धानमेवार्थोऽवगम्यते । अतोऽवगम्यते यत् प्रत्येकं पर्यायपदमनुसन्धानस्य, शोधस्य वा शाखाविशेषं, प्रकारविशेषं चोपगृह्य प्रवर्तितं प्रतिभाति । विशेषरूपेणाङ्ग्ल-शब्दाः शोधस्य पर्यायरूपाः डिस्कवरीत्यादयः आधुनिकभौतिक-रसायनादि-विज्ञान-



Scanned with OKEN Scanner

विषयस्यानुसन्धानाय प्रयुज्यन्ते, परन्तु शोध: अनुसन्धानं च भाषा-साहित्य-समाजशास्त्रादिविषयक-अनुसन्धानप्रसङ्गे प्रयुज्यते ।

परन्तु तटस्थपरिशीलनेन, स्वतन्त्र-चिन्तनेन च ज्ञायते यत् शोधस्यानुसन्धानस्य वा हिन्क-प्रोल्यादिशब्दानां वा लक्ष्यप्राप्ति-प्रक्रिया समाना एव, यतो हि विश्वस्मिन् प्रकृतिका एवास्ति तत्त्वैव व्यापकस्वरूपानुसन्धाने ज्ञान-विज्ञान-भाषा-साहित्यमनोविज्ञानादिविविधभागेषु प्रचलित: नानाविधशोध: नानाभिधानै: संबोध्यन्ते । वस्तुत: तत्र सर्वत्रैव पारस्परिको हि सम्बन्ध: प्रतिभाति । अस्य स्पष्टी-करणं फ्रिट्जोफ कापरा (Fritzof Capra) इति महतो वैज्ञानिकस्य पुस्तकानामध्ययनेन भवति - यथा - 'Problems must be seen as just different facets of one single crisis, which is largely a crisisi of perception. It derivers from the fact that most of us and specially our large social institutions subscribe to the concepts of an outdated worldview] a perception of reality inadequate for dealing with our overpopulated, globally interconnected world'. The web of life P.4

अत: पारमार्थिक-रूपेणाथर्ववेदस्य पृथिवीसूक्तं यथा केवलं देशविशेषस्य भूम्या: वर्णनं न करोति प्रत्युत् पृथिवी-सामान्य-तत्त्वस्यैव वर्णनं करोति - तथैव शोधादिपर्याया अपि सर्वे सर्वार्थ-वाचका: वर्तन्ते, तथापि वैशिष्ट्यात्तद्वादस्तद्वाद इति सिद्धान्तेन प्रवृत्तिर्भिन्नोऽनुसन्धान-पर्यायवाचिनां पदानाम्" - इति ।

सन्दर्भा: -

1. अभिज्ञानशाकुन्तलम् - प्रथमाङ्क:
2. तेजोबिन्दूपनि तथा च अनुसन्धानपद्धति: - डॉ. वागीश शास्त्री (सरस्वती सुषमा)
3. काव्यप्रकाश: 2/7 साक्षात् संकेतितं योऽर्थमभिधत्ते स वाचक: ।
4. तर्कभाषा - शब्द-प्र. ।
5. Vedanta and modern Science, by Ajit Kumar Sinha Pp. 104-105.


सन्दर्भग्रन्थसूची

1. शोधप्रविधि एवं पाण्डुलिपिविज्ञान - प्रो. अभिराजराजेन्द्र मिश्र
2. द्र. अभिज्ञानशाकुन्तलम् - प्रथमाङ्क:
3. Vedanta and modern science, by Ajit Kumar Sinha.



संविदाध्यापक: ( शिक्षाशास्त्रविभाग: ),
राष्ट्रियसंस्कृतसंस्थानम्,
क.जे. सोमैयासंस्कृतविद्यापीठम्,
विद्याविहार:, मुम्बई-७७

## विद्यापीठे प्रतिष्ठिताः विभागाः

- व्याकरणविभागः
- साहित्यविभागः
- ज्यौतिषविभागः
- शिक्षाशास्त्रविभागः
- आधुनिकविभागः
- शोधप्रकाशनविभागः
- मुक्तस्वाध्यायपीठम्
- अनौपचारिकसंस्कृतशिक्षणकेन्द्रम्
- वास्तुज्यौतिषपरिचयपाठ्यक्रमः

ख्यातं राष्ट्रियसंस्कृतं सुमहितं संस्थानमद्याखिलं,
वाणीवैभवमातनोति नितरां राष्ट्रे चतुर्दिग्भवम् ।
तत्रासौ निजगौरवेण महता सारस्वतं भासयन्,
सोमैयाभुवि भासते परिसरो मुम्बापुरे संस्थितः ।।


**राष्ट्रियसंस्कृतसंस्थानम्**

(मानवसंसाधनविकासमन्त्रालयभारतसर्वकाराधीनम्)

(मानितविश्वविद्यालयः)

**क.जे. सोमैयासंस्कृतविद्यापीठम्**

विद्याविहार, मुम्बई - ७७